**त्रुटिशस्** अव्य० त्रुटि+वीप्सार्थे शस्। त्रुटिस्त्रुटिरित्याद्यर्थे। "त्रुटिशो लवशश्चापि गण्यते कालनिश्चयः" भा० ७० ११८ अ०।

**त्रुन्प(म्प)** वधे भ्वा० पर० सक० सेट्। त्रुम्पति अत्रुम्पीत्। नोपधत्वे क्विपि त्रुप् त्रुपौ सोपधत्वे त्रुन् त्रुम्पौ इति भेदः।

**त्रुन्फ(म्फ)** वधे भ्वा० पर० सक० सेट्। त्रुम्फति अत्रुम्फीत्। नोपधत्वे क्विपि त्रुप् त्रुफौ सोपधत्वे त्रुन् त्रुम्फौ इति भेदः। [ ( फी)त्। तुत्रोप (फ)

**त्रुप(फ)** वधे भ्वा० पर० सक० सेट्। त्रोप(फ)ति अत्रोपी-

**त्रेता** स्त्री त्रित्वमिता पृषो०। दक्षिणाग्निगार्हपत्याहवनीयात्मके समुदिते १अग्नित्रये, सत्ययुगाव्यवहितानन्तरवर्त्तिनि युगभेदे, द्यूतक्रीडासाधनस्याक्षस्य यस्मिन् पार्श्वे त्रयोऽङ्कास्तस्य पार्श्वस्य उत्तानतया ३पतने, द्यूतविशेषे वराटकानां मध्ये त्रयाणामुत्तानतया ४पतने च "त्रेतया हृतसर्वस्वः" इति मृच्छकटिका। अयशब्दे २२४पृ० दृश्यम्

"त्रेतायुगमानञ्च दिव्यमानेन ३००० वर्षाः आदौ सन्ध्या ३०० । अन्ते सन्ध्यांशः ३०० मिलिताः ३६०० । वर्षाः मानुषमानेन ३६० गुणिता १२९६००० वर्षाः। यथाह मनुः "चत्वार्य्याहुः सहस्राणि वर्षाणान्तु कृतं युगम्। तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः। इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु। एकापायेन वर्त्तन्ते सहस्राणि शतानि च"। सि० शि० "खखाभ्रदन्तसागरैर्युगाग्नियुग्मभूगुणैः। क्रमेण सूर्य्यवत्सरैः कृतादयो युगाङ्घ्रयः। खसन्ध्यकाः तदंशकैर्निजार्क१२भागसम्मितैः। युताश्च तद्युता युगं रदाब्धयोऽयुताहताः" । खखाभ्रदन्तसागरैः ४३२००० अङ्कैस्त्रिभिर्गुणितैस्तन्मिता वर्षा त्रेतामानं तत्रापि त्रेतादौ सन्ध्यामानं १०८००० त्रेतामानं १०८०००० वर्षाः। त्रेतान्ते सन्ध्यांशमानम् १०८००० । मिलित्वा १२९६००० वर्षाः त्रेतामानम्। स्पष्टमुक्तं ब्रह्मवै० प्र० ख० "द्विषट्लक्षपरिमितं षण्णवतिसहस्रकम्। त्रेतायुगं परिमितं कालविद्भिः प्रकीर्त्तितम्" ।

"दण्डनीत्यां यदा राजा त्रीनंशाननुवर्त्तते। चतुर्थमंशमुत्सृज्य तदा त्रेता प्रवर्त्तते। अशुभस्य चतुर्थांशस्त्रीनंशाननुवर्त्तते। कृष्टपच्यैव पृथिवी भवन्त्योषधयस्तथा"। "राजा कृतयुगस्रष्टा त्रेताया द्वापरस्य च। युगस्य च चतुर्थस्य राजा भवति कारणम्। कृतस्य कारणाद्राजा स्वर्गमत्यन्तमश्नुते। त्रेतायाः कारणाद्राजा स्वर्गं नात्यन्तमश्नुते" भा० शा० ६९ अ०। तद्धर्माश्च "त्रेतायुगे समायाते धर्मः पादोनतां गतः। अल्पक्लेशान्विता लोकाः केचित्, केचिद्दयाशयाः। विष्णुध्यानरता लोका यज्ञदानपरायणाः। वर्णाश्रमाचाररताः सुखिनः सुस्थचेतसः। जना भूमिस्पृशः शूद्राः सर्वे ब्राह्मणसेविनः। ब्राह्मणाश्च महात्मानो वेदवेदाङ्गपारगाः। प्रतिग्रहनिवृत्ताश्च सत्यसन्धा जितेन्द्रियाः। तपोव्रतपरा नित्यं दातारो विष्णुसेविनः। कालवर्षी तडित्वांश्च स्त्रियः सर्वाः पतिव्रताः। वसुन्धरा च शस्याढ्या पुत्राश्च पितृसेविनः" इति पाद्मे क्रियायोगसारोक्ताः।

"अत्राहाद्या भगवती जीवानां निष्कृतिं यथा। कृते व्यतीते त्रेतायां दृष्ट्वा धर्मव्यतिक्रमम्। वेदोक्तकर्मभिर्मर्त्या न शक्ताः स्वेष्टसाधने। बहुक्लेशकरं कर्म वैदिकं भूरिसाधनम्। कर्त्तुं न योग्या मनुजाश्चिन्ताव्याकुलमानसाः। त्यक्तुं कर्त्तुं न चार्हन्ति सदा कातरचेतसः। वेदार्थयुक्तशास्त्राणि स्मृतिरूपाणि भूतले। तदा त्वं प्रकटीकृत्य तपःस्वाध्यायदुर्बलान्। लोकानतारयः पापात् दुःखशोकभयप्रदात्। त्वां विना कोऽस्ति जीवानां घोरसंसारसागरे। भर्त्ता पाता समुद्धर्त्ता पितृवत् प्रियकृत् प्रभुः" इति श्रीमहानिर्वाणतन्त्रे जीवोद्धारणहेतवे सदाशिवं प्रति जगन्मातुः वाक्यम्। तस्मिन् युगे पुरुषायुषकालस्य त्रिशतवर्षो मनुनोक्तो यथा "चतुष्पात् सकलो धर्मः सत्यञ्चैव कृते युगे। नाधर्मेणागमः कश्चिन्मनुष्यान् प्रतिवर्त्तते। इतरेष्वागमाद्धर्मः पादशस्त्ववरोपितः। चौरिकानृतमायाभिर्धर्मश्चापैति पादशः। अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः। कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः। वेदोक्तमायुर्मर्त्यानामाशिषश्चैव कर्मणाम्। फलन्त्यनुयुगं लोके प्रभावश्च शरीरिणाम्"।

पुराणान्तरे अयुतवर्षास्तत्काल उक्ताः अतएव "दशवर्षसहस्राणि रामो राज्यमकारयत्" इत्यादि सङ्गच्छते। तपसा आयुःकालाधिक्यमिति न मनूक्तिविरोधः इति तु न्याय्यम्।

"धर्मादौ हि यथा त्रेता वह्निस्त्रेता तथैव च। तथैव पुत्रपौत्राणां स्वर्गस्त्रेता किलाक्षयः" भा० आश्व० ९० अ०। अग्नित्रयस्य त्रेतानामनिरुक्तिर्यथा "त्रिधा प्रणीतो ज्वलनो मुनिभिर्वेदपारगैः। अतस्त्रेतात्वमा-